National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(66): 58-61
© 2026 NJHSR
www.sanskritarticle.com

**दीपककुमारचौधरी**
संस्कृत-शोधार्थी,
व्याकरणविभागीय-अनुसन्धाता,
कामेश्वर-सिंह-दरभङ्गा-संस्कृत-विश्वविद्यालयः, कामेश्वरनगरम्,
दरभङ्गा, बिहारम्

**Correspondence:**
**दीपककुमारचौधरी**
संस्कृत-शोधार्थी,
व्याकरणविभागीय-अनुसन्धाता,
कामेश्वर-सिंह-दरभङ्गा-संस्कृत-विश्वविद्यालयः, कामेश्वरनगरम्,
दरभङ्गा, बिहारम्

# "दुहादिद्विकर्मकधातूनां धात्वर्थसन्दर्भे दीक्षितनागेशयोर्वैमत्यम्"

**दीपककुमारचौधरी**

**"सर्वं नाम धातुजमाह"** इति निरुक्तकृन्महर्षियास्कवचनादिदं सिध्यति यद् विविधशब्दशास्त्रीयविषयेषु धातुविमर्शनं प्रमुखं स्थानमाधत्ते।धातुः सर्वविधानां शब्दानां मूलं वर्तते। अतः शब्दप्रकृतिः शब्दयोनिर्वा धातुः कथ्यते। दधाति विविधान् शब्दान् पदार्थान् यः स धातुरित्यन्वर्थनामा सकलपदप्रकृतिर्वर्तते। अतस्तन्महत्त्वं बहुधा भाष्यादिग्रन्थेषु प्रपञ्चितम्।

तद्यथा-

**"नाम च धातुजमाह निरुक्ते व्याकरणे शकटस्य च तोकम्।**
**यन्न पदार्थविशेषसमुत्थं प्रत्ययतः प्रकृतेश्च तदूह्यम्।।"**

(महाभाष्यम्-३.३.९)

**पुनश्च-**

**"सञ्ज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे।**
**कार्याद्विद्यादनूबन्धमेतच्छास्त्रमुणादिषु।।"**

(महाभाष्यम्-२.१३८)

अन्यद्धि-

**"बाहुलकं प्रकृतेस्तनुदृष्टेः प्रायसमुच्चयनादपि तेषाम्।**
**कार्यसशेषविधेश्च तदुक्तं नैगमरूढिभवं हि सुसाधु।।"**

(महाभाष्यम् काशिका च)

दुहादीनां धातूनां धात्वर्थसन्दर्भे प्राच्यनव्यवैयाकरणयोर्दीक्षितनागेशयोर्भिन्नं भिन्नं मतं वर्तते। तद्धि- **"अकथितं च" (अष्टाध्यायी-१.४.५१)** इति सूत्रेणानेन अपादानादिकारकाणाम् अविवक्षायां कर्मत्वं विधीयते।यतोहि व्याकरणशास्त्रे

**"विवक्षातः कारकाणि भवन्ति"**।

अत्र प्रमाणम्-

**"अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात्"** इति (सिद्धान्तकौमुदी)।

द्विकर्मकधातूनां परिगणनं पुनस्तत्रैव प्रतिपादितम्।तद्यथा-

**"दुह्याच्पच्दण्ड्रुधिप्रच्छिचिब्रूशासुजिमथ्मुषाम्।**
**कर्मयुक्स्यादकथितं तथा स्यान्नीहृकृष्वहाम्॥"**

(सिद्धान्तकौमुदी,कारकप्रकरणम्)

**"दुहादीनां द्वादशानां तथा नीप्रभृतीनां चतुर्णां कर्मणा यद्युज्यते तदेवाकथितं कर्मेति परिगणनं कर्तव्यमित्यर्थः"** इति तदर्थं निर्दिशति स्वयं हि सिद्धान्तकौमुदीकारो भट्टोजिदीक्षितः।

**"अकथितं च"(अष्टाध्यायी-१.४.५१)** इति शास्त्रोपदिष्टस्य अकथितशब्दोऽविवक्षितपरो न त्वप्रधानार्थपरः। अकथितशब्दस्य अप्रधानार्थस्वीकारे 'गोः पयो दोग्धि' एवं 'गां पयो दोग्धि' इति

वाक्यद्वयस्योपपत्तिर्न भविष्यति।यतोहि 'गोः पयो दोग्धि' इति वाक्ये उद्देश्यताश्रयं 'पयः' प्रधानं कर्म तथा 'गोः' अप्रधानं कर्म स्यात्।
अकथितशब्दस्य अविवक्षार्थस्वीकारे सति अपादानस्य अविवक्षापूर्वकं कर्मत्वं विवक्षायां 'गां पयो दोग्धि' तथापादानत्वेन विवक्षायां 'गोः पयो दोग्धि' इति वाक्यद्वयमुपपद्यते।
अन्यथा चेत्सर्वथा 'गां पयो दोग्धि' इत्येकं वाक्यमेवोपपद्यते।
इयम् अविवक्षा द्विधा भवति।
**(१).प्राप्तिपूर्विका अविवक्षा-**प्राप्तानाम् अपादानादीनाम् अविवक्षा प्राप्तिपूर्विकाविवक्षा भवति।
**(२).अप्राप्तिपूर्विका अविवक्षा-**सर्वथा अप्राप्तानाम् अपादानादीनाम् अप्राप्तिपूर्विकाविवक्षा भवति।
प्राप्तपूर्विकायाम् अविवक्षायां प्राप्तापादानादिसञ्ज्ञानां कर्मसञ्ज्ञया बाधः फलति।अथ च अप्राप्तिपूर्विकायाम् अविवक्षायां प्राप्तषष्ठीविभक्तेर्बाधः फलति।उभयथापि शाब्दबोधे कारकव्याप्यापादानादीनां कर्मत्वेनैव बोधो भवति।परं प्राचीना वैयाकरणाः **"अकथितं च"(अष्टाध्यायी-१.४.५१)** इति शास्त्रेण कर्मसञ्ज्ञाविधानपूर्वकं द्वितीयास्थले सम्बन्धत्वेन शाब्दबोधं स्वीकुर्वन्ति।यतोहि **"अकथितं च"(अष्टाध्यायी-१.४.५१)** इति शास्त्रेण कर्मसञ्ज्ञाविधानम् अपादानादिकारकाणामविवक्षायांप्राप्तषष्ठीविभक्तेर्बाधनपूर्वकं भवति। अतएव **"अकथितं च" (अष्टाध्यायी-१.४.५१)** इति शास्त्रविहिते कर्मणि द्वितीयायाः सम्बन्धत्वेन बाधो भवतीत्येतन्न युक्तियुक्तम् इति नागेशमतम्।यतोहि भवदीयमते अपादानादिसञ्ज्ञाविधायक-शास्त्रोपदेशाभावे सर्वत्र षष्ठीविभक्तिः प्राप्यत' इत्याकारकः कर्मादिकारकाणामपि सम्बन्धत्वेन बोधः स्यात्,परं कर्मादिकारकाणां क्वचिदपि सम्बन्धत्वेन बोधो न दृश्यते।अतः अपादानादिकारकाणाम् अविवक्षास्थले **"अकथितं च" (अष्टाध्यायी-१.४.५१)** इति शास्त्रेण विधीयमानया कर्मसञ्ज्ञया विहिताया द्वितीयाविभक्तेरपि कर्मत्वेन बोधो भवति।अत एव **"कर्मणि द्वितीया" (अष्टाध्यायी-२.३.२)** इति शास्त्रविहितद्वितीयया सह तस्य वैरूप्यं न भवति।भवन्मते **"अकथितं च" (अष्टाध्यायी-१.४.५१)** इति शास्त्रविहितकर्मसञ्ज्ञकद्वितीयायाः सम्बन्धत्वेन बोधस्तथा **"कर्तुरीप्सिततमं कर्म" (अष्टाध्यायी-१.४.४९)** इति शास्त्रविधीयमानकर्मसञ्ज्ञकद्वितीयायाः कर्मत्वेन बोधः इति उभयोः स्थलयोः पृथक्पृथग्बोधस्वीकारे **"कर्मणि द्वितीया" (अष्टाध्यायी २.३.२)**
इति शास्त्रविहितद्वितीयाया वैरूप्यापत्तिरवश्यम्भाविनी वर्तते।अर्थात् एकार्थोपस्थापिका द्वितीया न भविष्यति।**"अकथितं च" (अष्टाध्यायी-१.४.५१)** इति शास्त्रविहितद्वितीयायाः कर्मत्वेन बोधो भवति।अतः **"अकथितं च" (अष्टाध्यायी-१.४.५१)** इति शास्त्रोपदेशानाभीष्टसिद्धिः सम्भवास्ति।**"कर्तुरीप्सिततमं कर्म" (अष्टाध्यायी-१.४.४९)** तथा **"तथायुक्तं चानीप्सितम्" (अष्टाध्यायी १.४.५०)** इत्येतच्छास्त्रोप-देशद्वयमनर्थकम् इत्याकारिकाया आशङ्काया समाधानं भाष्यकृतैवं कृतं यत्-**"कर्तुरीप्सिततमं कर्म" (अष्टाध्यायी-१.४.४९)** तथा **"तथायुक्तं चानीप्सितम्" (अष्टाध्यायी १.४.५०)** इत्युभयशास्त्रोप-देशाभावे **"वारणार्थानामीप्सितः" (अष्टाध्यायी-१.४.२७)** इति सूत्रम् अपवादशास्त्रं भूत्वा **"परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः"** इति परिभाषाबलात् "अग्नेर्माणवकं वारयति" इति वाक्यघटकस्य 'माणवक' इत्यस्य अपादानसञ्ज्ञां करिष्यति।भवदीये मते **"अकथितं च" (अष्टाध्यायी-१.४.५१)** इति शास्त्रविहितकर्मसञ्ज्ञकद्वितीयायाः सम्बन्धत्वेन तथा **"कर्तुरीप्सिततमं कर्म" (अष्टाध्यायी-१.४.४९)** इति शास्त्रविहितकर्म-सञ्ज्ञकद्वितीयायाः कर्मत्वेन बोधो भवति।एवं शाब्दबोधीयप्रक्रियायां विभेदापत्तित्वात् **"अकथितं च" (अष्टाध्यायी-१.४.५१)** इति शास्त्रेणैव कार्यं स्यात्।
**"कर्तुरीप्सिततमं कर्म"(अष्टाध्यायी-१.४.४९)** तथा **"तथायुक्तं चानीप्सितम्"(अष्टाध्यायी १.४.५०)** इत्युभयशास्त्रोपदेशो न कर्त्तव्यः इत्याशङ्कैव नोत्थिता भविष्यति। कथञ्चित् **"तुष्यतु दुर्जन"** इति न्यायेन शङ्कोत्थापनस्वीक्रियते,तदापि प्रकृतशङ्काया शाब्दबोधवैरूप्यापत्तिहेतुत्वाद् भाष्यकारेण समाधानं कर्तव्यं स्यात्।न हि **"वारणार्थानामीप्सितः" (अष्टाध्यायी-१.४.२७)** इति सूत्रस्यापवादमुक्त्वा समाधानं वक्तव्यं स्यात्।अतः **"अकथितं च" (अष्टाध्यायी-१.४.५१)** इति शास्त्रविहितकर्मसञ्ज्ञकद्वितीयाया अपि कर्मत्वेन शाब्दबोधः स्वीकर्त्तव्यः।यतोहि भवदीयमते **"कर्तुरीप्सिततमं कर्म" (अष्टाध्यायी-१.४.४९)** तथा **"तथायुक्तं चानीप्सितम्" (अष्टाध्यायी-१.४.५०)** इत्युभयसूत्रस्थाने **"अकथितं च"(अष्टाध्यायी-१.४.५१)** इत्येकसूत्रोपदेशस्वीकारे **"अकथितं च" (अष्टाध्यायी-१.४.५१)** इति सूत्रेण ईप्सितानीप्सितयोरुभयत्र कर्मसञ्ज्ञा भविष्यति। इत्थञ्च 'अग्नेर्माणवकं वारयति' इति वाक्यघटकयोः अग्निमाणवकयोरुभयोः कर्मसञ्ज्ञा प्राप्यते,अथ च **"वारणार्थानामीप्सितः" (अष्टाध्यायी-१.४.२७)** इति शास्त्रेणोभयत्र अपादानसञ्ज्ञा प्राप्यते।यतोहि **"अकथितं च" (अष्टाध्यायी-१.४.५१)** इति सूत्रं दुहादिधातूनां योगे चारितार्थम् अस्ति।अत एव **"निरवकाशो विधिरपवादः"** इति वचनाद् वारिधातुयोगे **"वारणार्थानामीप्सितः" (अष्टाध्यायी१.४.२७)** इति सूत्रम् अपवादशास्त्रं भूत्वा **"अकथितं च"(अष्टाध्यायी-१.४.५१)** इति सूत्रं प्रबाध्य अग्निमाणवकयोरुभयत्र अपादानसञ्ज्ञा ततः **"अपादाने पञ्चमी" (अष्टाध्यायी-२.३.२८)** इति सूत्रेण पञ्चमीविभक्तिः स्यात्।**"कर्तुरीप्सिततमं कर्म"(अष्टाध्यायी-१.४.४९)** इति सूत्रस्य पृथगुपदेशस्वीकारे ईप्सिततमस्य कर्मसञ्ज्ञा तथा ईप्सितस्य **"वारणार्थानामीप्सितः"(अष्टाध्यायी-१.४.२७)** इत्यनेन अपादानसञ्ज्ञा भवति। एवं विषयभेदत्वाद् **"वारणार्थानामीप्सितः (अष्टाध्यायी-१.४.२७)** इति सूत्रे चारितार्थं न भवति।अतः माणवके पञ्चमीविभक्तिर्न भवति।
"अकथितं च"(अष्टाध्यायी-१.४.५१) इति शास्त्रं भाष्यकृता खण्डितम्।
तस्मान्नागेशभट्टेन स्वकीये सिद्धान्तकौमुदीव्याख्याग्रन्थे लघुशब्देन्दुशेखरे दुहादिधातूनां सन्दर्भे भाष्यसम्मतं प्रकारान्तरेण समाधानं प्रस्तुतम्।तद्धि-दुहादीनां धातूनां व्यापारद्वयार्थस्वीकारे

**"कर्तुरीप्सिततमं कर्म (अष्टाध्यायी-१.४.४९)** इति सूत्रेण उभयत्र कर्मसञ्ज्ञा भविष्यति।अतः **"अकथितं च"(अष्टाध्यायी-१.४.५१)** इति शास्त्रोपदेशस्य आवश्यकता नास्ति।यतः

**"फलैक्ये प्रत्याख्यानं वरं न तु फलभेदे"** इति नियमो वर्तते।भवन्मते **"अकथितं च"(अष्टाध्यायी-१.४.५१)** इति शास्त्रेण विहितकर्मसञ्ज्ञया समागतद्वितीयाविभक्तेः सम्बन्धत्वेन बोधो भवति,अथ च **"कर्तुरीप्सिततमं कर्म"(अष्टाध्यायी-१.४.४९)** इति शास्त्रविहितकर्मसञ्ज्ञया समागतद्वितीयाविभक्तेः कर्मत्वेन भानं भवति।अतः फलैक्याभावात् प्रत्याख्यानं असम्भवमासीत्।परं भाष्यकारेण दुहादीनां धातूनां धात्वर्थद्वयस्वीकृतिपूर्वकम् **"अकथितं च"(अष्टाध्यायी-१.४.५१)** इति सूत्रस्य प्रत्याख्यानं चकार।अतः द्विकर्मकधातुकारिकायां **"कर्मयुग्"** इत्युक्तं सङ्गच्छते।लघुशब्देन्दुशेखरे श्रीमान् नागेशभट्टस्तदाह-

**"कर्मयुक्तत्वं धात्वर्थव्यापारात् प्राक् तदनन्तरं वा तत्सम्बन्धत्वं बोध्यम्।तद्विषये तु तदनन्तरं तत्सम्बन्धत्वं बोध्यम्" इति (लघुशब्देन्दुशेखरः)।**

प्राच्यानां मते तु **"क्षरणानुकूलो व्यापारो दुहेर्थः**।

"गां पयो दोग्धि"' इति 'गोः सकाशात् पयो दोग्धि' इति वाक्यघटकस्य क्षरणानुकूलो व्यापारोऽर्थः। क्षरणानुकूलो व्यापारो गोपे तिष्ठति।गोपनिष्ठक्षरणानुकूलव्यापारजन्य-क्षरणरूपफलाश्रयं पयोनिष्ठम्।क्षरणव्यापारात् पयसो विभागो भवति।विभागावधित्वं गोनिष्ठम्।अतः अवधिभूतस्य गोशब्दस्य अपादानत्वं ततः पञ्चमीविभक्तिरायाति।गोरपादानत्वेनाविवक्षापूर्वकं कर्मत्वेन विवक्षा क्रियते चेद् अविवक्षितापादानस्य अवधिभूतस्य गोशब्दस्य कर्मभूतस्य पयश्शब्दस्य च सम्बन्धो भवति।अतः **"अकथितं च" (अष्टाध्यायी-१.४.५१)** इति शास्त्रेण गोशब्दस्य कर्मसञ्ज्ञायां सत्यां "गां पयो दोग्धि" इति वाक्यमुपपद्यते।परं भाष्यकृता

**"अकथितं च"(अष्टाध्यायी-१.४.५१)** इति शास्त्रस्य प्रत्याख्यानाद् **"विभागानुकूलव्यापारानुकूलव्यापारो दुहेर्थ"** इति नागेशेन स्वीक्रियते।

दुहधात्वर्थप्रधानीभूतव्यापारो गोपनिष्ठः, तज्जन्यविभागानुकूल-व्यापाररूपं फलं गोनिष्ठम्,अथ च गोनिष्ठव्यापारजन्यविभागरूपफलं पयोनिष्ठम्।अतः गोपयसोरुभयोरपि **"कर्तुरीप्सिततमं कर्म" (अष्टाध्यायी-१.४.४९)** इति शास्त्रेणैव कर्मसञ्ज्ञां प्रतिपाद्य "अकथितं च"(अष्टाध्यायी-१.४.५१) इति सूत्रं भाष्यकृता प्रत्याख्यातम्। तस्मादेव**"गोकर्मक-पयःकर्मक-दोहनानुकूलव्यापारः"**इति भाष्यकृन्मते शाब्दबोधः फलति।

एवमेव द्विकर्मकधातूनां विषये सर्वत्र नव्यानां मते व्यापारद्वयात्मको धात्वर्थो ज्ञेयः।विस्तरभयात्तथा प्रसङ्गानूकूलाच्चात्र केवलं धात्वर्थनिरूपणं क्रियते।तद्यथा-

**"बलिं याचते वसुधाम्** "-अत्र **"परस्वत्वनिवृत्तिपूर्वक-स्वस्वोत्पत्त्यनकुलो व्यापारो याचेरर्थ** इति प्राच्यमतं तथा **परस्वत्वनिवृत्तिपूर्वक-स्वस्वोत्पत्त्यनकुल-व्यापारानुकूलव्यापारो याचेरर्थ** इति नव्यमतम्।

**"बलिकर्मक-वसुधाकर्मक-स्वीकारानुकूलाव्यापारः"** इति शाब्दबोधो ज्ञेयः। लघुशब्देन्दुशेखरे नागेशेन तदुच्यते-**"याचेः स्वीकारानुकूल-व्यापारोऽर्थः।**

**स्वीकारश्च 'इदमेव करिष्यामि' इति शब्दप्रयोगजनको ज्ञानविशेषः। (लघुशब्देन्दुशेखरः)**

**"बलिं भिक्षते वसुधाम्"** इत्यत्र **परस्वत्वनिवृत्तिपूर्वक-स्वस्वोत्पत्त्य-नुकूलव्यापारो याचेरर्थः**।अत्र स्वत्वं वसुधायां तिष्ठति ,अथ च स्वत्वनिरूपितं स्वामित्वं बलौ तिष्ठति।अर्थात् वसुधानिष्ठ-स्वत्वनिरूपितस्वामित्वं बलिनिष्ठम्।अतः वसुधात्र कर्म वर्तते।वसुधाया बलिना सार्धं स्वस्वामिभावसम्बन्धे सति प्रकृतस्थले बलिराज्ञि सम्बन्धसामान्ये **"षष्ठी शेषे" (अष्टाध्यायी-२.३.५०)** इति सूत्रेण षष्ठीविभक्तिः प्राप्यते।तदविवक्षायाम् **"अकथितं च" (अष्टाध्यायी-१.४.५१)** इति सूत्रेण बलेः कर्मत्वमिति प्राचां मतम्।

व्यापारद्वयात्मकपक्षे **परस्वत्वनिवृत्तिपूर्वक-स्वस्वोत्पत्त्यनुकूल-व्यापारानुकूलव्यापारो याचेरर्थः**। याचधात्वर्थप्रधानीभूतव्यापारो याचकनिष्ठः,तज्जन्यः "अहं ददामि" अर्थात् याचकस्वोत्पत्त्यनुकूल-व्यापाराश्रयो बलिस्तथा याचकस्वोत्वोत्पत्तिरूपफलाश्रयं वसुधा।एवं बलिवसुधयोर्द्वयोरपि **"कर्तुरीप्सिततमं कर्म" (अष्टाध्यायी-१.४.४९)** इति सूत्रेणैव कर्मत्वसिद्धिः।

**"तण्डुलान् ओदनं पचति"** इत्यत्र **"विक्लित्यनूकूलो व्यापारः पचेरर्थः"** इत्येकव्यापारार्थस्वीकृतिपक्षावम्बिनां मतम्।परं **"कर्तुरीप्सिततमं कर्म"**

**अष्टाध्यायी-१.४.४९)** इति सूत्रव्याख्यायां महाभाष्यटीकायां **"विक्लित्तिनिर्वृत्त्युभयफलानुकूलव्यापारः पचेरर्थः"** इति कैयटवचना-नुरोधाद्व्यापारद्वयार्थवादिभिस्तन्मतं दूष्यते।यतोहि तण्डुले विक्लेदने सति ओदनस्य निर्वर्तनं भवति।अतएव विक्लेदनरूपफलाश्रयत्वात् तण्डुलस्य तथा निर्वर्तनरूपफलाश्रयत्वादोदनस्य कर्मत्वं **"कर्तुरीप्सिततमं कर्म" (अष्टाध्यायी-१.४.४९)** इति सूत्रेणैव सिध्यति।अतस्तन्मते **"अकथितं च" (अष्टाध्यायी-१.४.५१)** इति सूत्रस्य एतदुदाहरणं चिन्त्यमेव।

**"गर्गान् शतं दण्डयति"-** इत्यत्र **स्वसम्प्रदानकदानानुकूल-व्यापारानुकूल-शासनव्यापारो वा दण्डेरर्थः**। अत एव दानरूप-फलाश्रयत्वात् शतस्य तथा दानानुकूलव्यापाररूपफलाश्रयत्वाद् गर्गस्य च कर्मत्वं **"कर्तुरीप्सिततमं कर्म" (अष्टाध्यायी-१.४.४९)** इति शास्त्रेणैव सङ्गच्छते।अतः **"अकथितं च"**

**अष्टाध्यायी-१.४.५१)** इति शास्त्रोपदेशस्य व्यर्थत्वं सुतरां स्पष्टमेव।

**"व्रजमवरुणद्धि गाम्"** इत्यत्र **"निर्गमप्रतिबन्धकपूर्वक-यत्किञ्चिदधि-करणक-चिरस्थित्यनुकूलव्यापारानुकूलव्यापारो रुधेरर्थः"**। **"माणवकं पन्थानं पृच्छति"** इत्यत्र **जिज्ञासाविषयार्थज्ञानानुकूलः,केन पथा गन्तव्यम् इत्यभिलाषादिरूपो व्यापारः पृच्छेरर्थः**। अर्थात् **"जिज्ञासाविषयार्थज्ञानानुकूल-व्यापारानुकूलव्यापारो पृच्छेरर्थः"** इति व्यापारद्वयार्थवादिनां मतम्।एवमेवान्येषां द्विकर्मकधातूनां विषये ज्ञेयम्।

यद्यपि दुहादिधातूनां व्यापारद्वयार्थस्वीकारे सति **"कर्तुरीप्सिततमं कर्म" अष्टाध्यायी -१.४.४९)** इति शास्त्रेणैव गोपयसोरुभयोरपि कर्मत्वरूपकार्योपपत्तिः सम्भवास्ति तथा **"अकथितं च" (अष्टाध्यायी-१.४.५१)** इति शास्त्रोपदेशो निष्प्रयोजनः। दुहादिधातूनाम् एकव्यापारात्मकार्थस्वीकृतिपक्षे अविवक्षितस्यापादानादेः कर्म-सञ्ज्ञायां सत्यां "गाम्" इति गौणकर्म कथ्यते।अत एव कर्मवाच्यप्रयोगे (कर्मणि प्रत्ययविवक्षायाम्) गौणकर्मणि प्रथमाविभक्तौ सत्यां "गौः पयो दुह्यते" इति प्रयोगोपपत्तिर्भविष्यति।तदुच्यते-

**"गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम्।**
**विभक्तिः प्रथमा ज्ञेया द्वितीया च तदन्यत:।।**
**बुद्धिभक्षार्थयोः शब्दकर्मणां च निजेच्छया।**
**प्रयोज्यकर्मण्यन्येषां ण्यन्तानां लादयो मता।।"**

परं दुहादिधातूनां व्यापारद्वयार्थस्वीकृतिपक्षे गोपयसोरुभयोरपि प्रधानकर्मत्वं सिध्यति।एवं स्थितौ कर्मणि प्रत्ययविवक्षायां कस्मिन् कर्मणि प्रत्ययविधानं स्यादिति समस्या समापतति इत्याशङ्का सम्भाव्यते चेत् समाधीयते-दुहादिधातूनाम् एकव्यापारात्मकार्थ-स्वीकृतिपक्षे कर्मणि प्रत्ययविवक्षायां **"गौणे कर्मणि....."** इति नियमेन नियमनं भवति स्म।अथ च दुहादिधातूनां व्यापारद्वयार्थस्वीकृतिपक्षे कर्मणि प्रत्ययविवक्षायां

**"प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम्।**
**अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः।।"**

इति नियमेन नियमनं भवति।

"गां पयो दोग्धि " इत्यत्र प्रधानं कर्म किमित्याशङ्कायामुच्यते - कर्तृनिष्ठप्रधानीभूतव्यापारे यस्य फलस्य साक्षादन्वयो भवति, तत्फलाश्रयं प्रधानं कर्म कथ्यते। व्यापारद्वयार्थकविवक्षायां विभागानुकूलव्यापारानुकूलव्यापारो दुहधात्वर्थो विद्यते। गोपनिष्ठ-दुहधात्वर्थप्रधानीभूतव्यापारे विभागानुकूलव्यापारव्यापाररूपस्य फलस्य साक्षादन्वयो भवति।इदं फलं गोनिष्ठम्।अतएव "गो" इति प्रधानं कर्म कथ्यते।एवं व्यापारद्वयार्थस्वीकारपक्षेऽपि कर्मणि प्रत्ययविवक्षायां "गौः पयो दुह्यते" इति प्रयोगोपपत्तिर्भवतीति शम्।

**सन्दर्भग्रन्थसूची-**

१.अष्टाध्यायी
२.महाभाष्यम्
३.निरुक्तम्
४.सिद्धान्तकौमुदी
५.लघुशब्देन्दुशेखरः
६.काशिका
७.बालमनोरमा च